लोकप्रियसाहित्यग्रन्थमाला-70

पं. प्रेमनारायणद्विवेदिरचनावलिः

तृतीयो भागः

# तुलसीसूरकाव्यसङ्ग्रहः

सम्पादकः

डॉ. ऋषन्भारद्वाजः ( ऋषभः )

राष्ट्रियसंस्कृतसंस्थानम्

मानितविश्वविद्यालयः

( भारतशासनमानवसंसाधनविकासमन्त्रालयाधीनम् )

नवदेहली

लोकप्रियसाहित्यग्रन्थमाला - 70

# पं. प्रेमनारायणद्विवेदिरचनावलिः

## तृतीयो भागः

# तुलसीसूरकाव्यसङ्ग्रहः

प्रधानसम्पादकः

**आचार्यराधावल्लभत्रिपाठी**

कुलपतिः

राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

सम्पादकः

डॉ. ऋषन्भारद्वाजः ( ऋषभः )

संस्कृतविभागः, डॉ. हरीसिंहगौरविश्वविद्यालयः

सागरम् ( म.प्र. )

राष्ट्रिय संस्कृत संस्थानम्

( मानित विश्वविद्यालयः )

नवदेहली

# सम्पादकीयम्

वेदशास्त्रपुराणादीनां लोकोपयोगिकथ्यं सरसतया प्रतिपादयति काव्यम्। काव्यसरित् आवाल्मीकेः इदानीं यावत् प्रवहमाणा वर्तते। देशकालभाषादि- बन्धनं काव्यधारां न बाधते । यासु भारतीयभाषासु विविधानि काव्यानि विरचितानि सन्ति तासु संस्कृतजा हिन्दी अतीव महत्त्वं धत्ते। हिन्दीभाषायाः सूरदासः तुलसीदासः चेति कविद्वयस्य वर्तते विश्वसाहित्ये महत्त्वपूर्णं स्थानम्। तयोः प्रसिद्धिं सूक्तिरियं नितरां प्रमाणयति-**सूर सूर तुलसी ससी, उडुगन केसवदास। अब के कवि खद्योत सम, जहँ तहँ करहिं प्रकास।।**एतस्य कविद्वयस्य सुप्रसिद्धग्रन्थानां गीर्वाणवाण्यामनुवादः कृतोऽस्ति भारतवर्षस्य हृदयप्रदेशस्थितस्य सागरनगरस्य निवासिना राष्ट्रपतिपुरस्कृतेन पं.प्रेमनारायणद्विवेदिमहाभागेन।

पं. द्विवेदी स्वाध्यायकाले आदर्शविद्यार्थी अध्यापनकाले आदर्शशिक्षकश्च भवति स्म। तस्य विद्यार्थिनः तस्य अध्यापनकलां गुरुशिष्यपरम्परापोषणं च इदानीमपि प्रशंसन्ति । विद्याविनयसम्पन्नः कविरयं भगवच्चर्चाम् अध्ययनम- अध्यापनपाठ्यचर्चां वा करोति स्म अथवा तु मौनमाचरति स्म। एकविंशतिसहस्र ( 21000 ) परिमितानि पद्यानि तस्य संस्कृतसाधनां परिचाययन्ति। मौलिककाव्यरचनापेक्षया अन्यासां भाषाणां काव्यानाम् अनुवदने पं.द्विवेदिवर्यस्य महती रुचिरासीत्।

राष्ट्रियसंस्कृतसंस्थानस्य लोकप्रियसाहित्यग्रन्थमालायां 'पं. प्रेमनारायणद्विवेदिरचनावलिः 'इतिनाम्ना कवेः रचनानां प्रकाशनस्य सङ्कल्पनायां प्रथमो भागः 'काव्यसङ्ग्रहः' द्वितीयो भागः 'सप्तशतीसङ्ग्रहः' च प्रकाशितौ स्तः। अस्मिन्नेव क्रमे तृतीयोऽयं भागः प्रकाशमायाति 'तुलसीसूरकाव्यसङ्ग्रहः 'नाम।

तुलसीसूरकाव्यसङ्ग्रहनामके तृतीये भागे द्वौ खण्डौ स्तः। प्रथमखण्डे तुलसीदासविरचितानामष्टग्रन्थानां संस्कृतपद्यानुवादः द्वितीयखण्डे च

# अनुक्रमः

पुरोवाक् - राधावल्लभः त्रिपाठी *iii*
सम्पादकीयम् - डॉ. ऋषभभारद्वाजः *v*

## प्रथमखण्डः - तुलसीकाव्यसङ्ग्रहः

1. विनयपत्रिका 3
2. कवितावलिः 23
3. श्लोकावलिः 88
4. श्रीजानकीमङ्गलम् 148
5. श्रीपार्वतीमङ्गलम् 168
6. वैराग्यसन्दीपनी 183
7. वरवैरामायणम् 189
8. श्रीमद्धनुमद्बाहुकम् 197

## द्वितीयखण्डः - सूरकाव्यसङ्ग्रहः

1. सूररामचरितावलिः 213
2. सूरविनयपत्रिका 302

जय हे सच्चिदानन्द जयन्तमदखण्डन।
विराधसूदने दक्ष सुराणां भयभञ्जन।
सूर्पणखारूपहरण रघुवंशविभूषण।
चतुर्दश सहस्राणां राक्षसाणां विनाशक।
जय हे दण्डकारण्यभूमिपावनकारण।
जय हे जानकीनाथ भक्तसंशयनाशन ॥ 113 ॥

जय रामकबन्धारे मायाहरिणमन्थन।
गृध्रस्योद्धरणे दक्ष शबरीमोक्षदायक।
जय बालिवधे दक्ष सुग्रीवहितकारण।
सीतावियोगसंतप्त सिन्धुसेतुनिबन्धन।
जय हे करुणासिन्धो विभीषणसुखप्रद।
जय हे जानकीनाथ जय सर्वाभयप्रद ॥ 114 ॥

सुमेरुपर्वतक्षेत्रे बीजं चिन्तामणेर्यदि।
कामधेनुसुधातुल्यदुग्धसिक्तं पुनः पुनः।
तीर्थराजाङ्कुरो रम्यो यक्षेशेण सुरक्षितः।
सुमरकतपत्राणि मञ्जर्यः कमलासमाः।
कल्पवृक्षः प्रकृत्याऽसौ सुखं वर्षतु मङ्गलम्।
तथापि जायते किं वै रघुवीरकरोपमः ॥ 115 ॥

वीरो नश्यतु शक्तिमानपि रणाद् यो याति दूरे भयाद्
योगी नश्यतु योगवित् स विषयान् त्यक्तुं समर्थो न यः।
दानं यो न ददाति नश्यतु धनी धर्मं विना चाधनो
विद्वान् नश्यतु पण्डितो न कुरुते सत्कर्म यो मोहतः ॥ 116 ॥

क्रोधात् को नहि दह्यते स्म हृदये दासो न कामस्य को
लोभः कं न बबन्ध दीर्घनिगडे त्रासाय लोकस्य च।
नारीलोचनतीक्ष्णबाणनिहतः सौख्येन शेते स्म को
जात्यन्धो न हि कोऽत्र लोचनयुतः संप्राप्य लक्ष्मीं नरः ॥ 117 ॥

राष्ट्रियसंस्कृतसंस्थानम्
मानितविश्वविद्यालयः
( भारतशासनमानवसंसाधनविकासमन्त्रालयाधीनम् )
56-57, इन्स्टीट्यूशनल् एरिया, जनकपुरी,
नवदेहली-110058